# Mahadeva Stuti by Kuleshvara Pandya

# कुलेश्वरपाण्ड्यकृता महादेवस्तुतिः

## Document Information

Text title : Mahadeva Stuti by Kuleshvara Pandya

File name : mahAdevastutiHkuleshvarapANDya.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

# कुलेश्वरपाण्ड्यकृता महादेवस्तुतिः

कुलेश्वरः-

महानीपारण्यान्तरकनकपद्माकरतटी
　　महेन्द्रानीताष्टद्विपधृतविमानोद्वसितम् ।
महालीलाभूतिप्रकटितविशिष्टात्मविभवं
　　महादेवं वन्दे मधुरशफराक्षीसहचरम् ॥ १॥

महामातङ्गासृग्धरवसनमद्रीन्द्रतनया-
　　महाभाग्यं मत्तान्धककरटिकण्ठीरववरम् ।
महाभोगीन्द्रोद्यत्फणमणिगणालङ्कृततनुं
　　महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ २॥

महादुग्धाम्भोधौ मथन जव सम्भूतमसितं
　　महाहालं कण्ठे सकलभयभङ्गाय दधतम् ।
महाकारुण्याब्धिं मधुमथनदृग्दूरचरणं
　　महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ ३॥

नमन्नालीकाम्बुजभवशुनासीरमकुटी-
　　लसन्माणिक्यांशुस्फुरदरुणपादाब्जयुगलम् ।
अमन्दानन्दाब्धिं हरिनयनपद्मार्चितपदं
　　महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ ४॥

समीराहारेन्द्राङ्गदमखिललोकैकजनकं
　　समीराहारात्मप्रवणजनहृत्पद्मनिलयम् ।
सुमीनाक्षीवक्त्राम्बुजतरुणसूर्यं सुमनसं
　　महादेवं वन्दे मधुरशफराक्षी सहचरम् ॥ ५॥

नताघौघारण्यानलमनिलभुङ्नाथवलयं
　　सुधांशोरर्धांशं शिरसि दधतं जह्नुसुतया ।
वदान्यानामाद्यं वरविबुधवन्द्यं वरगुणं

महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ ६॥

दशास्याहङ्कारद्रुमकुलिशिताङ्गुष्ठनखरं
निशानाथश्रीजिन्निजवदनबिम्बं निरवधिम् ।
विशालाक्षं विश्वप्रभवभरणापायकरणं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ ७॥

अनाकारं हारीकृतभुजगराजं पुरहरं
सनाथं शर्वाण्या सरसिरुहपत्रायतदृशम् ।
दिनारम्भादित्यायुतशतनिभानन्दवपुषं
महादेवं वन्दे मधुरशफराक्षी सहचरम् ॥ ८॥

उमापीनोत्तुङ्गस्तनतटलसत्कुङ्कुमरजस्-
समाहारात्यन्तारुणविपुलदोरन्तरतलम् ।
रमावाणीन्द्राणीरतिविरचिताराधनविधिं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ ९॥

धरापाथस्स्वाहासहचरजगत्प्राणशशभृत्
सुराध्वाहर्नाथाध्वरकरशरीरं शशिधरम् ।
सुराहारास्वादातिशयिनिजवाचं सुखकरं
महादेवं वन्दे मधुरशफराक्षी सहचरम् ॥ १०॥

धरापीठं धाराधरकलशमाकाशवपुषं
धराभृद्दोर्दण्डं तपनशशिवैश्वानरदृशम् ।
विराजन्नक्षत्रप्रसवमुदरीभूतजलधिं
महादेवं वन्दे मधुरशफराक्षीसहचरम् ॥ ११॥

सुपर्णाकाङ्क्षाम्भोजासनदृगतिदूराङ्घ्रिशिरसं
सुपर्णाहारस्रक्सुरविटपि शाखायतभुजम् ।
अपर्णापादाब्जातिचलित चन्द्रार्द्धमकुटं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ १२॥

मखारातिं मन्दस्मितमधुरबिम्बाधरलसन्-
मुखाम्भोजं मुग्धामृतकिरणचूडामणिधरम् ।
नखाकृष्टेभत्वक्परिवृतशरीरं पशुपतिं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ १३॥

सहस्राब्जैकोने निजनयनमुद्धृत्य यजते
सहस्राख्यापूर्त्यै सरसिजदृशो येन कृपया ।
सहस्रारं दत्तं तपननियुताभं रथपदं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ १४॥

रथावन्याम्नायाश्वमजरथकारं रणपटुं
रथाङ्गादित्येन्दुं रथपदधरास्त्रं रथिवरम् ।
रथाधारेष्वासं रथधरगुणं रम्यफलदं
महादेवं वन्दे मधुर शफराक्षीसहचरम् ॥ १५॥

धराकर्षापास्त प्रचुरभुजकण्डूयनजल-
न्धराहार्यद्वैधीकरणहृत लोकत्रयभयम् ।
स्मराकाराहाराकलनपटुफालानलकणं
महादेवं वन्दे मधुरशफराक्षीसहचरम् ॥ १६ ॥

अगस्त्यः-
इदं सुन्दरनाथस्य स्तोत्रं भक्त्या पठन्ति ये ।
श्रिया परमया युक्ताः शिवमन्ते भजन्ति ते ॥ १७॥

सुन्दरेश्वरमीशानं सुमीनाक्षीसुनायकम् ।
कुलेश्वरमहीपाल इति स्तोत्रैरतोषयत् ॥ १८॥

अथ वाचाऽशरीरिण्या शङ्करस्सुन्दरेश्वरः ।
स्तोत्रप्रियः प्रियादाह भूपतिं पुरतः स्थितम् ॥ १९॥

इति कुलेशपाण्ड्यकृता स्तुतिः समाप्ता ।
श्रीस्कान्दे महापुराणे अगस्त्यसंहितायां
हालास्यमाहात्म्ये अध्यायः -६२ -लीला -५६ श्लोकानि ४८-६३
(शिवलीलार्णवतः)

Proofread by Rajesh Thyagarajan

*Mahadeva Stuti by Kuleshvara Pandya*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*